ओं नमः परमात्मने, श्री महागणपतये नमः,

श्री गुरुभ्यो नमः, ह॒रि॒ः ओं

# कृष्ण यजुर्वेदीय तैत्तिरीय संहिता पद पाठः

# (वाक्य सहित)

# पञ्चमकाण्डे पञ्चमः प्रश्नः

**Notes:**

1. **Please refer to the book “TS Kandam 1” and “TS 1.1 pada paadam with Vaakyam” for notes and conventions used in this Compilation.**
2. **Please download our vedic compilations from our web site www.vedavms.in**

**Version 1.0** **May 31, 2021**

## Version Notes:

**This is now the current Version 1.0 dated May 31, 2021.**

1. This replaces the earlier version 0.1 dated May 31, 2020.

2. This version has been updated with the errors found and reported till May 31, 2021.

3. Required convention, style and presentation improvements or standardisations has been done whereever applicable.

4. Notify your corrections / suggestions etc to our email id vedavms@gmail.com

## Earlier Versions

| | | |
|---|---|---|
| 1st | Version Number | 0.0 dated 31st August 2018 |
| 2nd | Version Number | 0.0 dated 31st January 2019 |
| 3rd | Version Number | 0.0 dated 30th September 2019 |
| 4th | Version Number | 0.1 dated 31st May 2020 |

# Table of Contents

5 कृष्ण यजुर्वेदीय तैत्तिरीय संहितायां पद पाठे पञ्चमं काण्डं 4

**5.5 पञ्चमकाण्डे पञ्चमः प्रश्नः–वायव्यपश्वाद्यानं निरूपणं .4**

ओं नमः परमात्मने, श्री महागणपतये नमः,

श्री गुरुभ्यो नमः , हरिः ओं

# 5 कृष्ण यजुर्वेदीय तैत्तिरीय संहितायां पद पाठे पञ्चमं काण्डं

## 5.5 पञ्चमकाण्डे पञ्चमः प्रश्नः–वायव्यपश्वाद्यानं निरूपणं

**TS 5.5.1.1**

यदेकेन सꣳस्थापयति यज्ञस्य सन्तत्या अविच्छेदायैन्द्राः पशवो ये मुष्करा यदैन्द्राः सन्तोऽग्निभ्य आलभ्यन्ते देवताभ्यः समदं दधात्याग्नेयी स्त्रिष्टुभो याज्यानुवाक्याः कुर्याद्–यदाग्नेयीस्तेना ऽऽग्नेया यत् त्रिष्टुभस्तेनैन्द्राः समृद्ध्यै न देवताभ्यः समदं दधाति वायवे नियुत्वते तूपरमा लभते तेजो ऽग्नेर्वायु स्तेजस एष आ लभ्यते तस्माद्–यद्रियङ् वायु– [ ] **1**

**TS 5.5.1.1 - Padam**

यत् । एकेन । सꣳस्थापयतीति सं – स्थापयति । यज्ञस्य ।

सन्तत्या इति सं – तत्यै । अविच्छेदायेत्यवि – छेदाय । ऐन्द्राः ।

पशवः । ये । मुष्कराः । यत् । ऐन्द्राः । सन्तः । अग्निभ्य

इत्यग्नि – भ्यः । आलभ्यन्त इत्या – लभ्यन्ते । देवताभ्यः ।

समदमिति स – मदम् । दधाति । आग्नेयीः । त्रिष्टुभः ।

याज्यानुवाक्या इति याज्या – अनुवाक्याः । कुर्यात् । यत् ।

आग्नेयीः । तेन । आग्नेयाः । यत् । त्रिष्टुभः । तेन । ऐन्द्राः ।

समृद्ध्या इति सं – ऋद्ध्यै । न । देवताभ्यः । समदमिति

स – मदम् । दधाति । वायवे । नियुत्वत इति नि–युत्वते । तूपरम् ।

एति । लभते । तेजः । अग्नेः । वायुः । तेजसे । एषः । एति ।

लभ्यते । तस्मात् । यद्रियङ् । वायुः । **1 (50)**

**TS 5.5.1.2**

–र्वाति तद्रियङ्ङ्–ग्निर्दहति स्वमेव तत् तेजोऽन्वेति यन्न नियुत्वते

स्यादुन्माद्येद्–यजमानो नियुत्वते भवति यजमानस्याऽ*नुन्मादाय

वायुमती श्वेतवती याज्यानुवाक्ये भवतः सतेजस्त्वाय हिरण्यगर्भः समवर्तताग्र इत्याघारमा घारयति प्रजापतिर्वै हिरण्यगर्भः प्रजापते–रनुरूपत्वाय सर्वाणि वा एष रूपाणि पशूनां प्रत्या लभ्यते यच्छ्मश्रुण स्तत्– [ ] **2**

**TS 5.5.1.2 - Padam**

वाति । तद्रियङ् । अग्निः । दहति । स्वम् । एव । तत् । तेजः । अन्विति । एति । यत् । न । नियुत्वत इति नि – युत्वते । स्यात् । उदिति । माद्येत् । यजमानः । नियुत्वत इति नि – युत्वते । भवति । यजमानस्य । अनुन्मादायेत्यनुत् – मादाय । वायुमती इति वायु – मती । श्वेतवती इति श्वेत – वती । याज्यानुवाक्ये इति याज्या – अनुवाक्ये । भवतः । सतेजस्त्वायेति सतेजः – त्वाय । हिरण्यगर्भ इति हिरण्य – गर्भः । समिति । अवर्तत । अग्रे । इति । आघारमित्या – घारम् । एति । घारयति । प्रजापतिरिति प्रजा–पतिः । वै । हिरण्यगर्भ इति हिरण्य – गर्भः । प्रजापतेरिति प्रजा – पतेः ।

अनुरूपत्वायेत्यनुरूप – त्वाय । सर्वाणि । वै । एषः । रूपाणि ।
पशूनाम् । प्रति । एति । लभ्यते । यत् । श्मश्रुणः । तत् । **2 (50)**

**TS 5.5.1.3**

पुरुषाणाꣳ रूपं ँयत् तूपर स्तदश्वानां ँयदन्यतोदन् तद्–गवां ँयदव्या इव शफास्तदवीनां ँयदज स्तदजानां ँवायुर्वै पशूनां प्रियं धाम यद्–वायव्यो भवत्येतमेवैनमभि संजानानाः पशव उप तिष्ठन्ते वायव्यः कार्या(3)ः प्राजापत्या(3) इत्याहु–र्यद्–वायव्यं कुर्यात् प्रजापतेरियाद्–यत् प्राजापत्यं कुर्याद्–वायो – [ ] **3**

**TS 5.5.1.3 - Padam**

पुरुषाणाम् । रूपम् । यत् । तूपरः । तत् । अश्वानाम् । यत् ।
अन्यतोदन्नित्यन्यतः – दन्न् । तत् । गवाम् । यत् । अव्याः । इव ।
शफाः । तत् । अवीनाम् । यत् । अजः । तत् । अजानाम् । वायुः ।
वै । पशूनाम् । प्रियम् । धाम । यत् । वायव्यः । भवति । एतम् ।
एव । एनम् । अभीति । सञ्जानाना इति सं – जानानाः । पशवः ।
उपेति । तिष्ठन्ते । वायव्यः । कार्या(3)ः ।

प्राजापत्या(3) इति प्राजा – पत्या(3)ः । इति । आहुः । यत् ।
वायव्यम् । कुर्यात् । प्रजापतेरिति प्रजा – पतेः । इयात् । यत् ।
प्राजापत्यमिति प्राजा – पत्यम् । कुर्यात् । वायोः । **3 (50)**

**TS 5.5.1.4**

–रियाद्–यद्–वायव्यः पशुर्भवति तेन वायोर्नैति यत् प्राजापत्यः
पुरोडाशो भवति तेन प्राजापतेर्नैति यद् द्वादशकपाल स्तेन
वैश्वानरान्नै–त्याग्नावैष्णव–मेकादशकपालं निर्वपति दीक्षिष्यमाणोऽग्निः
सर्वा देवता विष्णुर्यज्ञो देवताश्चैव यज्ञं चाऽऽ रभतेऽग्निरवमो
देवतानां ँविष्णुः परमो यदाग्नावैष्णव–मेकादशकपालं
निर्वपति देवता – [ ] **4**

**TS 5.5.1.4 - Padam**

इयात् । यत् । वायव्यः । पशुः । भवति । तेन । वायोः । न । एति ।
यत् । प्राजापत्य इति प्राजा – पत्यः । पुरोडाशः । भवति । तेन ।
प्रजापतेरिति प्रजा – पतेः । न । एति । यत् ।
द्वादशकपाल इति द्वादश – कपालः । तेन । वैश्वानरात् । न । एति ।

आग्नावैष्णवमित्याग्ना – वैष्णवम् । एकादशकपालमित्येकादश–कपालम् । निरिति । वपति । दीक्षिष्यमाणः । अग्निः । सर्वाः । देवताः । विष्णुः । यज्ञः । देवताः । च । एव । यज्ञम् । च । एति । रभते । अग्निः । अवमः । देवतानाम् । विष्णुः । परमः । यत् । आग्नावैष्णवमित्याग्ना – वैष्णवम् । एकादशकपालमित्येकादश–कपालम् । निर्वपतीति निः – वपति । देवताः । **4 (50)**

**<u>TS 5.5.1.5</u>**

एवोभयतः परिगृह्य यजमानो ऽव रुन्धे पुरोडाशेन वै देवा अमुष्मिन्ँल्लोक आर्द्ध्नुवन् चरुणा ऽस्मिन्. यः कामयेतामुष्मिन्ँल्लोक ऋद्ध्नुयामिति स पुरोडाशं कुर्वीता ऽमुष्मिन्नेव लोक ऋद्ध्नोति यदष्टाकपाल स्तेनाऽऽग्नेयो यत् त्रिकपालस्तेन वैष्णवः समृद्ध्यै यः कामयेतास्मिन्ँल्लोक ऋद्ध्नुयामिति स चरुं कुर्वीताग्नेर्घृतँविष्णोस्तण्डुला–स्तस्मा–[ ] **5**

**TS 5.5.1.5 - Padam**

एव । उभयतः । परिगृह्येति परि–गृह्य । यजमानः । अवेति । रुन्धे ।

पुरोडाशेन । वै । देवाः । अमुष्मिन्न् । लोके । आर्द्ध्नुवन्न् । चरुणा ।

अस्मिन्न् । यः । कामयेत । अमुष्मिन्न् । लोके । ऋद्ध्नुयाम् । इति ।

सः । पुरोडाशम् । कुर्वीत । अमुष्मिन्न् । एव । लोके । ऋद्ध्नोति ।

यत् । अष्टाकपाल इत्यष्टा – कपालः । तेन । आग्नेयः । यत् ।

त्रिकपाल इति त्रि – कपालः । तेन । वैष्णवः । समृद्ध्या इति

सं – ऋद्ध्यै । यः । कामयेत । अस्मिन्न् । लोके । ऋद्ध्नुयाम् ।

इति । सः । चरुम् । कुर्वीत । अग्नेः । घृतम् । विष्णोः । तण्डुलाः ।

तस्मात् । **5 (50)**

**TS 5.5.1.6**

–च्चरुः कार्यो ऽस्मिन्नेव लोक ऋद्ध्नोत्यादित्यो भवतीयं ँवा

अदितिरस्यामेव प्रति तिष्ठत्यथो अस्यामेवाधि यज्ञं तनुते यो वै

सँवथ्सर–मुख्य–मभृत्वा ऽग्निं चिनुते यथा सामि गर्भो ऽवपद्यते

तादृगेव तदार्तिमार्च्छेद्–वैश्वानरं द्वादशकपालं पुरस्तान्निर्वपेथ्

सँवथ्सरो वा अग्निर्वैश्वानरो यथा संवथ्सरमाप्त्वा – [ ] **6**

**TS 5.5.1.6 - Padam**

चरुः । कार्यः । अस्मिन्न् । एव । लोके । ऋद्ध्नोति । आदित्यः ।

भवति । इयम् । वै । अदितिः । अस्याम् । एव । प्रतीति । तिष्ठति ।

अथो इति । अस्याम् । एव । अधीति । यज्ञम् । तनुते । यः । वै ।

सँवथ्सरमिति सं – वथ्सरम् । उख्यम् । अभृत्वा । अग्निम् ।

चिनुते । यथा । सामि । गर्भः । अवपद्यत इत्यव – पद्यते । तादृक् ।

एव । तत् । आर्तिम् । एति । ऋच्छेत् । वैश्वानरम् ।

द्वादशकपालमिति द्वादश – कपालम् । पुरस्तात् । निरिति । वपेत् ।

सँवथ्सर इति सं – वथ्सरः । वै । अग्निः । वैश्वानरः । यथा ।

सँवथ्सरमिति सं – वथ्सरम् । आप्त्वा । **6 (50)**

**TS 5.5.1.7**

काल आगते विजायत एवमेव सँवथ्सरमाप्त्वा काल आगते ऽग्निं

चिनुते नाऽऽ*र्तिमार्च्छत्येषा वा अग्नेः प्रिया तनूर्यद्–वैश्वानरः

प्रियामेवास्य तनुवमव रुन्धे त्रीण्येतानि हवी(ग्)षि भवन्ति त्रय इमे लोका एषां ँल्लोकाना(ग्) रोहाय ॥ 7

**TS 5.5.1.7 - Padam**

काले । आगत इत्या – गते । विजायत इति वि – जायते । एवम् । एव । सँवथ्सरमिति सं – वथ्सरम् । आप्त्वा । काले । आगत इत्या – गते । अग्निम् । चिनुते । न । आर्तिम् । एति । ऋच्छति । एषा । वै । अग्नेः । प्रिया । तनूः । यत् । वैश्वानरः । प्रियाम् । एव । अस्य । तनुवम् । अवेति । रुन्धे । त्रीणि । एतानि । हवी(ग्) षि । भवन्ति । त्रयः । इमे । लोकाः । एषाम् । लोकानाम् । रोहाय ॥ 7 (38) *(यद्रियङ् वायु – र्यच्छमश्रुणस्तद् – वायो – र्निर्वपति देवता – स्तस्मा – दाप्त्वा – ऽष्टात्रि(ग्)शच्च ) (A1)*

**TS 5.5.2.1**

प्रजापतिः प्रजाः सृष्ट्वा प्रेणा ऽनु प्राविशत् ताभ्यः पुनः संभवितुं नाशक्नोथ् सोऽब्रवीदृद्ध्नवदिथ् स यो मेतः पुनः संचिनवदिति तं देवाः समचिन्वन् ततो वै त आर्द्ध्नुवन्. यथ् समचिन्वन् तच्चित्यस्य

चित्यत्वं ँय एवं ँविद्वानग्निं चिनुत ऋद्ध्नोत्येव कस्मै

क–मग्निश्चीयत इत्याहुरग्निवा – [ ] **8**

**TS 5.5.2.1 - Padam**

प्रजापतिरिति प्रजा – पतिः । प्रजा इति प्र – जाः । सृष्ट्वा ।

प्रेणा । अनु । प्रेति । अविशत् । ताभ्यः । पुनः । संभवितुमिति

सं – भवितुम् । न । अशक्नोत् । सः । अब्रवीत् । ऋद्ध्नवत् ।

इत् । सः । यः । मा । इतः । पुनः । संचिनवदिति सं – चिनवत् ।

इति । तम् । देवाः । समिति । अचिन्वन्न् । ततः । वै । ते ।

आर्द्ध्नुवन्न् । यत् । समचिन्वन्निति सं – अचिन्वन्न् । तत् ।

चित्यस्य । चित्यत्वमिति चित्य – त्वम् । यः । एवम् । विद्वान् ।

अग्निम् । चिनुते । ऋद्ध्नोति । एव । कस्मै । कम् । अग्निः ।

चीयते । इति । आहुः । अग्निवानित्यग्नि – वान् । **8 (50)**

**TS 5.5.2.2**

–नसानीति वा अग्निश्चीयते ऽग्निवानेव भवति कस्मै कमग्निश्चीयत

इत्याहुर्देवा मा वेदन्निति वा अग्निश्चीयते विदुरेनं देवाः कस्मै

कमग्निश्चीयत इत्याहुर्गृह्यसानीति वा अग्निश्चीयते गृह्येव भवति कस्मै कमग्निश्चीयत इत्याहुः पशुमानसानीति वा अग्नि– [ ] 9

**TS 5.5.2.2 - Padam**

असानि । इति । वै । अग्निः । चीयते । अग्निवानित्यग्नि – वान् । एव । भवति । कस्मै । कम् । अग्निः । चीयते । इति । आहुः । देवाः । मा । वेदन्न् । इति । वै । अग्निः । चीयते । विदुः । एनम् । देवाः । कस्मै । कम् । अग्निः । चीयते । इति । आहुः । गृही । असानि । इति । वै । अग्निः । चीयते । गृही । एव । भवति । कस्मै । कम् । अग्निः । चीयते । इति । आहुः । पशुमानिति पशु – मान् । असानि । इति । वै । अग्निः । **9 (50)**

**TS 5.5.2.3**

–श्चीयते पशुमानेव भवति कस्मै कमग्निश्चीयत इत्याहुः सप्त मा पुरुषा उप जीवानिति वा अग्निश्चीयते त्रयः प्राञ्चस्त्रयः प्रत्यञ्च आत्मा सप्तम एतावन्त एवैनममुष्मिन् ँल्लोक उप जीवन्ति

प्रजापतिरग्निमचिकीषत तं पृथिव्यब्रवीन्न मय्यग्निं चेष्यसे ऽति
मा धक्ष्यति सा त्वा ऽतिदह्यमाना वि धविष्ये – [ ] **10**

**TS 5.5.2.3 - Padam**

चीयते । पशुमानिति पशु – मान् । एव । भवति । कस्मै । कम् ।
अग्निः । चीयते । इति । आहुः । सप्त । मा । पुरुषाः । उपेति ।
जीवान् । इति । वै । अग्निः । चीयते । त्रयः । प्राञ्चः । त्रयः ।
प्रत्यञ्चः । आत्मा । सप्तमः । एतावन्तः । एव । एनम् । अमुष्मिन् ।
लोके । उपेति । जीवन्ति । प्रजापतिरिति प्रजा – पतिः । अग्निम् ।
अचिकीषत । तम् । पृथिवी । अब्रवीत् । न । मयि । अग्निम् ।
चेष्यसे । अतीति । मा । धक्ष्यति । सा । त्वा ।
अतिदह्यमानेत्यति – दह्यमाना । वीति । धविष्ये । **10 (50)**

**TS 5.5.2.4**

स पापीयान् भविष्यसीति सोऽब्रवीत् तथा वा अहं करिष्यामि यथा
त्वा नातिधक्ष्यतीति स इमा–मभ्यमृशत् प्रजापतिस्त्वा सादयतु तया
देवतया ऽङ्गिरस्वद् ध्रुवा सीदेतीमामेवेष्टकां कृत्वोपा–धत्ता–नतिदाहाय

यत् प्रत्यग्निं चिन्वीत तदभि मृशेत् प्रजापतिस्त्वा सादयतु तया देवतयाऽङ्गिरस्वद् ध्रुवा सीदे– [ ] **11**

**<u>TS 5.5.2.4 - Padam</u>**

सः । पापीयान् । भविष्यसि । इति । सः । अब्रवीत् । तथा । वै । अहम् । करिष्यामि । यथा । त्वा । न । अतिधक्ष्यतीत्यति–धक्ष्यति । इति । सः । इमाम् । अभीति । अमृशत् । प्रजापतिरिति प्रजा–पतिः । त्वा । सादयतु । तया । देवतया । अङ्गिरस्वत् । ध्रुवा । सीद । इति । इमाम् । एव । इष्टकाम् । कृत्वा । उपेति । अधत्त । अनतिदाहायेत्यनति – दाहाय । यत् । प्रतीति । अग्निम् । चिन्वीत । तत् । अभीति । मृशेत् । प्रजापतिरिति प्रजा–पतिः । त्वा । सादयतु । तया । देवतया । अङ्गिरस्वत् । ध्रुवा । सीद । **11 (50)**

**<u>TS 5.5.2.5</u>**

–तीमामेवेष्टकां कृत्वोप धत्तेऽनतिदाहाय प्रजापतिरकामयत प्र जायेयेति स एतमुख्यमपश्यत् त७ं सँवथ्सरमबिभस्ततो वै स प्राजायत तस्माथ् सँवथ्सरं भार्यः प्रैव जायते तं ँवसवोऽब्रुवन्

प्र त्वमजनिष्ठा वयं प्रजायामहा इति तं ँवसुभ्यः प्रायच्छत् तं त्रीण्यहान्यबिभरुस्तेन – [ ] 12

**TS 5.5.2.5 - Padam**

इति । इमाम् । एव । इष्टकाम् । कृत्वा । उपेति । धत्ते । अनतिदाहायेत्यनति – दाहाय । प्रजापतिरिति प्रजा – पतिः । अकामयत । प्रेति । जायेय । इति । सः । एतम् । उख्यम् । अपश्यत् । तम् । सँवथ्सरमिति सं – वथ्सरम् । अबिभः । ततः । वै । सः । प्रेति । अजायत । तस्मात् । सँवथ्सरमिति सं–वथ्सरम् । भार्यः । प्रेति । एव । जायते । तम् । वसवः । अब्रुवन्न् । प्रेति । त्वम् । अजनिष्ठाः । वयम् । प्रेति । जायामहै । इति । तम् । वसुभ्य इति वसु – भ्यः । प्रेति । अयच्छत् । तम् । त्रीणि । अहानि । अबिभरुः । तेन । 12 (50)

**TS 5.5.2.6**

त्रीणि च शतान्यसृजन्त त्रयस्त्रि८ंशतं च तस्मात् त्र्यहं भार्यः प्रैव जायते तान् रुद्रा अब्रुवन् प्र यूयमजनिढ्वं ँवयं प्र जायामहा

इति त७ रुद्रेभ्यः प्रायच्छन् त७ षडहान्यबिभरु स्तेन त्रीणि च शतान्यसृजन्त त्रयस्त्रि७शतं च तस्माथ् षडहं भार्यः प्रैव जायते तानादित्या अब्रुवन् प्र यूय–मजनिढ्वं ँवयं– [ ] 13

**TS 5.5.2.6 - Padam**

त्रीणि । च । शतानि । असृजन्त । त्रयस्त्रि७शतमिति त्रयः– त्रि७शतम् । च । तस्मात् । त्र्यहमिति त्रि – अहम् । भार्यः । प्रेति । एव । जायते । तान् । रुद्राः । अब्रुवन्न् । प्रेति । यूयम् । अजनिढ्वम् । वयम् । प्रेति । जायामहै । इति । तम् । रुद्रेभ्यः । प्रेति । अयच्छन्न् । तम् । षट् । अहानि । अबिभरुः । तेन । त्रीणि । च । शतानि । असृजन्त । त्रयस्त्रि७शतमिति त्रयः – त्रि७शतम् । च । तस्मात् । षडहमिति षट् – अहम् । भार्यः । प्रेति । एव । जायते । तान् । आदित्याः । अब्रुवन्न् । प्रेति । यूयम् । अजनिढ्वम् । वयम् । **13 (50)**

**TS 5.5.2.7**

प्र जायामहा इति त–मादित्येभ्यः प्रायच्छन् तं द्वादशाहान्यबिभरु

स्तेन त्रीणि च शतान्यसृजन्त त्रयस्त्रि॒ꣳशतं च तस्माद् द्वादशाहं

भार्यः प्रैव जायते तेन वै ते सहस्रमसृजन्तोखा॒ꣳ सहस्रतमीं ँय

एवमुख्य॒ꣳ साहस्रं ँवेद प्र सहस्रं पशूनाप्नोति ॥ **14**

**TS 5.5.2.7 - Padam**

प्रेति । जायामहै । इति । तम् । आदित्येभ्यः । प्रेति । अयच्छन्न् ।

तम् । द्वादश । अहानि । अबिभरुः । तेन । त्रीणि । च । शतानि ।

असृजन्त । त्रयस्त्रि॒ꣳशतमिति त्रयः – त्रि॒ꣳशतम् । च । तस्मात् ।

द्वादशाहमिति द्वादश – अहम् । भार्यः । प्रेति । एव । जायते । तेन ।

वै । ते । सहस्रम् । असृजन्त । उखाम् । सहस्रतमीमिति

सहस्र – तमीम् । यः । एवम् । उख्यम् । साहस्रम् । वेद । प्रेति ।

सहस्रम् । पशून् । आप्नोति ॥ **14 (40)**

*(अग्निवान् – पशुमानसानीति वा अग्नि – र्द्धविष्ये – मृशेत्*

*प्रजापतिस्त्वा सादयतु तया देवतयाऽङ्गिरस्व ध्रुवा सीद – तेन –*

*तानादित्या अब्रुवन् प्र यूयमजनिढ्वं वँयं – चत्वारि॒ꣳशच्च) (A2)*

**TS 5.5.3.1**

यजुषा वा एषा क्रियते यजुषा पच्यते यजुषा वि मुच्यते यदुखा सा वा एषैतर्.हि यातयाम्नी सा न पुनः प्रयुज्येत्याहुरग्ने **युक्ष्वा** हि ये तव **युक्ष्वा** हि देवहूतमा॒ꣳ इत्युखायां जुहोति तेनैवैनां पुनः प्र युङ्क्ते तेनायातयाम्नी यो वा अग्निं ँयोग आगते युनक्ति युङ्क्ते युञ्जानेष्वग्ने – [ ] 15

**TS 5.5.3.1 - Padam**

यजुषा । वै । एषा । क्रियते । यजुषा । पच्यते । यजुषा । वीति । मुच्यते । यत् । उखा । सा । वै । एषा । एतर्.हि । यातयाम्नीति यात – याम्नी । सा । न । पुनः । प्रयुज्येति प्र – युज्या । इति । आहुः । अग्ने । युक्ष्व । हि । ये । तव । युक्ष्व । हि । देवहूतमानिति देव – हूतमान् । इति । उखायाम् । जुहोति । तेन । एव । एनाम् । पुनः । प्रेति । युङ्क्ते । तेन । अयातयाम्नीत्ययात – याम्नी । यः । वै ।

अग्निम् । योगे । आगत इत्या – गते । युनक्ति । युङ्क्ते । युञ्जानेषु । अग्ने । **15 (50)**

**TS 5.5.3.2**

युक्ष्वा हि ये तव युक्ष्वा हि देवहूतमाꣳ इत्याहैष वा अग्नेर्योगस्तेनैवैनं ँयुनक्ति युङ्क्ते युञ्जानेषु ब्रह्मवादिनो वदन्ति न्यङ्ङ्ग्निश्चेतव्या(3) उत्ताना(3) इति वयसां ँवा एष प्रतिमया चीयते यदग्निर्यन्न्यञ्चं चिनुयात् पृष्टित एनमाहुतय ऋच्छेयुर्यदुत्तानं न पतितुꣳ शक्नुयादसुवर्ग्योऽस्य स्यात् प्राचीनमुत्तानं – [ ] **16**

**TS 5.5.3.2 - Padam**

युक्ष्व । हि । ये । तव । युक्ष्व । हि । देवहूतमानिति देव – हूतमान् । इति । आह । एषः । वै । अग्नेः । योगः । तेन । एव । एनम् । युनक्ति । युङ्क्ते । युञ्जानेषु । ब्रह्मवादिन इति ब्रह्म – वादिनः । वदन्ति । न्यङ् । अग्निः । चेतव्या(3)ः । उत्ताना(3) इत्युत् – ताना(3)ः । इति । वयसाम् । वै । एषः । प्रतिमयेति प्रति – मया । चीयते । यत् । अग्निः । यत् । न्यञ्चम् ।

चिनुयात् । पृष्टितः । एनम् । आहुतय इत्या – हुतयः । ऋच्छेयुः ।
यत् । उत्तानमित्युत्–तानम् । न । पतितुम् । शक्नुयात् ।
असुवर्ग्य इत्यसुवः–ग्यः । अस्य । स्यात् । प्राचीनम् ।
उत्तानमित्युत्–तानम् । **16 (50)**

**<u>TS 5.5.3.3</u>**

पुरुषशीर्.षमुप दधाति मुखत एवैनमाहुतय ऋच्छन्ति नोत्तानं चिनुते सुवर्ग्यो ऽस्य भवति सौर्या जुहोति चक्षुरेवास्मिन् प्रति दधाति द्विर्जुहोति द्वे हि चक्षुषी समान्या जुहोति समान२ं हि चक्षुः समृद्ध्यै देवासुराः सँयत्ता आसन् ते वामं ँवसु सं न्यदधत तद्–देवा वामभृता ऽवृञ्जत तद्–वामभृतो वामभृत्त्वं ँयद्–वामभृत ( ) मुपदधाति वाममेव तया वसु यजमानो भ्रातृव्यस्य वृङ्क्ते हिरण्यमूर्द्ध्नी भवति ज्योतिर्वै हिरण्यं ज्योतिर्वामं ज्योतिषैवास्य ज्योतिर्वामं ँवृङ्क्ते द्वियजुर्भवति प्रतिष्ठित्यै ॥ **17**

**TS 5.5.3.3 - Padam**

पुरुषशीर्.षमिति पुरुष–शीर्.षम् । उपेति । दधाति । मुखतः ।
एव । एनम् । आहुतय इत्या – हुतयः । ऋच्छन्ति । न ।
उत्तानमित्युत्– तानम् । चिनुते । सुवर्ग्य इति सुवः – ग्यः ।
अस्य । भवति । सौर्या । जुहोति । चक्षुः । एव । अस्मिन्न् ।
प्रतीति । दधाति । द्विः । जुहोति । द्वे इति । हि । चक्षुषी इति ।
समान्या । जुहोति । समानम् । हि । चक्षुः ।
समृद्ध्या इति सं – ऋद्ध्यै । देवासुरा इति देव – असुराः ।
सँयत्ता इति सं – यत्ताः । आसन्न् । ते । वामम् । वसु । सम् ।
नीति । अदधत । तत् । देवाः । वामभृतेति वाम – भृता ।
अवृञ्जत । तत् । वामभृत इति वाम – भृतः । वामभृत्त्वमिति
वामभृत् – त्वम् । यत् । वामभृतमिति वाम – भृतम् ( ) ।
उपदधातीत्युप – दधाति । वामम् । एव । तया । वसु । यजमानः ।
भ्रातृव्यस्य । वृङ्क्ते । हिरण्यमूर्द्ध्नीति हिरण्य – मूर्द्ध्नी । भवति ।

ज्योतिः । वै । हिरण्यम् । ज्योतिः । वामम् । ज्योतिषा । एव । अस्य । ज्योतिः । वामम् । वृङ्क्ते । द्वियजुरिति द्वि-यजुः । भवति । प्रतिष्ठित्या इति प्रति-स्थित्यै ॥ **17 (74)** *(युञ्जानेष्वग्ने – प्राचीनमुत्तानं – वाँमभृतं – चतुर्विं॑शतिश्च) (A3)*

**TS 5.5.4.1**

आपो वरुणस्य पत्नय आसन् ता अग्निरभ्यद्ध्यायत् ताः समभवत् तस्य रेतः परा ऽपतत् तदियमभवद्-यद् द्वितीयं परा ऽपतत् तदसावभवदियं वै विराडसौ स्वराड् यद्-विराजावुपदधातीमे एवोप धत्ते यद्-वा असौ रेतः सिञ्चति तदस्यां प्रति तिष्ठति तत् प्र जायते ता ओषधयो – [ ] **18**

**TS 5.5.4.1 - Padam**

आपः । वरुणस्य । पत्नयः । आसन्न् । ताः । अग्निः । अभीति । अद्ध्यायत् । ताः । समिति । अभवत् । तस्य । रेतः । परेति । अपतत् । तत् । इयम् । अभवत् । यत् । द्वितीयम् । परापतदिति परा – अपतत् । तत् । असौ । अभवत् । इयम् । वै ।

विराडिति वि – राट् । असौ । स्वराडिति स्व – राट् । यत् ।

विराजाविति वि – राजौ । उपदधातीत्युप–दधाति । इमे इति । एव ।

उपेति । धत्ते । यत् । वै । असौ । रेतः । सिञ्चति । तत् । अस्याम् ।

प्रतीति । तिष्ठति । तत् । प्रेति । जायते । ताः । ओषधयः । **18 (50)**

**TS 5.5.4.2**

वीरुधो भवन्ति ता अग्निरत्ति य एवं वेँद प्रैव जायते ऽन्नादो भवति

यो रेतस्वी स्यात् प्रथमायां तस्य चित्यामुभे उप दद्ध्यादिमे एवास्मै

समीची रेतः सिञ्चतो यः सिक्तरेताः स्यात् प्रथमायां तस्य

चित्यामन्यामुप दद्ध्यादुत्तमायामन्या७ रेत एवास्य

सिक्तमाभ्यामुभयतः परि गृह्णाति सँवथ्सरं न क – [ ] **19**

**TS 5.5.4.2 - Padam**

वीरुधः । भवन्ति । ताः । अग्निः । अत्ति । यः । एवम् । वेद ।

प्रेति । एव । जायते । अन्नाद इत्यन्न – अदः । भवति । यः ।

रेतस्वी । स्यात् । प्रथमायाम् । तस्य । चित्याम् । उभे इति । उपेति ।

दद्ध्यात् । इमे इति । एव । अस्मै । समीची इति । रेतः ।

सिञ्चतः । यः । सिक्तरेता इति सिक्त–रेताः । स्यात् । प्रथमायाम् । तस्य । चित्याम् । अन्याम् । उपेति । दद्ध्यात् । उत्तमायामित्युत्–तमायाम् । अन्याम् । रेतः । एव । अस्य । सिक्तम् । आभ्याम् । उभयतः । परीति । गृह्णाति । सँवथ्सरमिति सं – वथ्सरम् । न । कम् । **19 (50)**

**TS 5.5.4.3**

ञ्चन प्रत्यवरोहेन्न हीमे कञ्चन प्रत्यवरोहतस्तदेनयोर्व्रतं यो वा अपशीर्.षाणमग्निं चिनुते ऽपशीर्.षा ऽमुष्मिन् ँल्लोके भवति यः सशीर्.षाणं चिनुते सशीर्.षा ऽमुष्मिन् ँल्लोके भवति चित्तिं जुहोमि मनसा घृतेन यथा देवा इहाऽऽगमन् वीतिहोत्रा ऋतावृधः समुद्रस्य वयुनस्य पत्मन् जुहोमि विश्वकर्मणे विश्वा ऽहा ऽमर्त्यꣳ हविरिति स्वयमातृण्णामुपधाय जुहोत्ये– [ ] **20**

**TS 5.5.4.3 - Padam**

चन । प्रत्यवरोहेदिति प्रति – अवरोहेत् । न । हि । इमे इति । कम् । चन । प्रत्यवरोहत इति प्रति – अवरोहतः । तत् । एनयोः । व्रतम् ।

यः । वै । अपशीर्.षाणमित्यप - शीर्.षाणम् । अग्निम् । चिनुते ।
अपशीर्.षेत्यप - शीर्.षा । अमुष्मिन्न् । लोके । भवति । यः ।
सशीर्.षाणमिति स - शीर्.षाणम् । चिनुते । सशीर्.षेति
स - शीर्.षा । अमुष्मिन्न् । लोके । भवति । चित्तिम् । जुहोमि ।
मनसा । घृतेन । यथा । देवाः । इह । आगमन्नित्या - गमन्न् ।
वीतिहोत्रा इति वीति - होत्राः । ऋतावृध इत्यृत - वृधः ।
समुद्रस्य । वयुनस्य । पत्मन्न् । जुहोमि । विश्वकर्मण इति
विश्व - कर्मणे । विश्वा । अहा । अमर्त्यम् । हविः । इति ।
स्वयमातृण्णामिति स्वयं - आतृण्णाम् । उपधायेत्युप - धाय ।
जुहोति । **20 (50)**

**TS 5.5.4.4**

तद्-वा अग्नेः शिरः सशीर्.षाणमेवाग्निं चिनुते सशीर्.षा ऽमुष्मिन्
ँल्लोके भवति य एवं ँवेद सुवर्गाय वा एष लोकाय चीयते
यदग्निस्तस्य यदयथापूर्वं क्रियतेऽसुवर्ग्यमस्य तथ्
सुवर्ग्यो ऽग्नि श्चिति-मुपधायाभि मृशेच्चित्तिमचित्तिं चिनवद्-वि

विद्वान् पृष्ठेव वीता वृजिना च मर्तान् राये च नः स्वपत्याय ( ) देव दितिं च रास्वादिति–मुरुष्येति यथापूर्वमेवैनामुप धत्ते प्राञ्चमेनं चिनुते सुवर्ग्यो ऽस्य भवति ॥ 21

**TS 5.5.4.4 - Padam**

एतत् । वै । अग्नेः । शिरः । सशीर्.षाणमिति स – शीर्.षाणम् । एव । अग्निम् । चिनुते । सशीर्.षेति स – शीर्.षा । अमुष्मिन्न् । लोके । भवति । यः । एवम् । वेद । सुवर्गायेति सुवः – गाय । वै । एषः । लोकाय । चीयते । यत् । अग्निः । तस्य । यत् । अयथापूर्वमित्ययथा – पूर्वम् । क्रियते । असुवर्ग्यमित्यसुवः–ग्यम् । अस्य । तत् । सुवर्ग्य इति सुवः – ग्यः । अग्निः । चितिम् । उपधायेत्युप – धाय । अभीति । मृशेत् । चित्तिम् । अचित्तिम् । चिनवत् । वीति । विद्वान् । पृष्ठा । इव । वीता । वृजिना । च । मर्तान् । राये । च । नः । स्वपत्यायेति सु – अपत्याय ( ) । देव ।

दितिम् । च । रास्व । अदितिम् । उरुष्य । इति । यथापूर्वमिति

यथा – पूर्वम् । एव । एनाम् । उपेति । धत्ते । प्राञ्चम् । एनम् ।

चिनुते । सुवर्ग्य इति सुवः – ग्यः । अस्य । भवति ॥ **21 (68)**

*(ओषधयः – कं – जुहोति – स्वपत्याया – ष्टादश च) (A4)*

**TS 5.5.5.1**

विश्वकर्मा दिशां पतिः स नः पशून् पातु सो ऽस्मान् पातु तस्मै

नमः प्रजापती रुद्रो वरुणो ऽग्निर्दिशां पतिः स नः पशून् पातु

सो ऽस्मान् पातु तस्मै नम एता वै देवता एतेषां पशूना–मधिपतय–

स्ताभ्यो वा एष आ वृश्च्यते यः पशुशीर्.षाण्युपदधाति हिरण्येष्टका

उप दधात्येताभ्य एव देवताभ्यो नमस्करोति ब्रह्मवादिनो – [ ] **22**

**TS 5.5.5.1 - Padam**

विश्वकर्मेति विश्व – कर्मा । दिशाम् । पतिः । सः । नः । पशून् ।

पातु । सः । अस्मान् । पातु । तस्मै । नमः । प्रजापतिरिति

प्रजा – पतिः । रुद्रः । वरुणः । अग्निः । दिशाम् । पतिः । सः ।

नः । पशून् । पातु । सः । अस्मान् । पातु । तस्मै । नमः । एताः ।

वै । देवताः । एतेषाम् । पशूनाम् । अधिपतय इत्यधि – पतयः ।
ताभ्यः । वै । एषः । एति । वृश्च्यते । यः । पशुशीर्.षाणीति
पशु – शीर्.षाणि । उपदधातीत्युप – दधाति । हिरण्येष्टका इति
हिरण्य – इष्टकाः । उपेति । दधाति । एताभ्यः । एव । देवताभ्यः ।
नमः । करोति । ब्रह्मवादिन इति ब्रह्म – वादिनः । **22 (50)**

**<u>TS 5.5.5.2</u>**

वदन्त्यग्नौ ग्राम्यान् पशून् प्र दधाति शुचा ऽऽरण्यानर्पयति किं
तत उच्छि॒ꣳषतीति यद्धिरण्येष्टका उपदधात्यमृतं ँवै हिरण्यममृतेनैव
ग्राम्येभ्यः पशुभ्यो भेषजं करोति नैनान् हिनस्ति प्राणो वै प्रथमा
स्वयमातृण्णा व्यानो द्वितीया ऽपान स्तृतीया ऽनु प्राण्यात् प्रथमाꣳ
स्वयमातृण्णामुपधाय प्राणेनैव प्राणꣳ समर्द्धयति
व्यन्याद् – [ ] **23**

**<u>TS 5.5.5.2 - Padam</u>**

वदन्ति । अग्नौ । ग्राम्यान् । पशून् । प्रेति । दधाति । शुचा ।
आरण्यान् । अर्पयति । किम् । ततः । उदिति । शिꣳषति । इति ।

यत् । हिरण्येष्टका इति हिरण्य – इष्टकाः । उपदधातीत्युप–दधाति । अमृतम् । वै । हिरण्यम् । अमृतेन । एव । ग्राम्येभ्यः । पशुभ्य इति पशु – भ्यः । भेषजम् । करोति । न । एनान् । हिनस्ति । प्राण इति प्र – अनः । वै । प्रथमा । स्वयमातृण्णेति स्वयं – आतृण्णा । व्यान इति वि – अनः । द्वितीया । अपान इत्यप–अनः । तृतीया । अनु । प्रेति । अन्यात् । प्रथमाम् । स्वयमातृण्णामिति स्वयं – आतृण्णाम् । उपधायेत्युप – धाय । प्राणेनेति प्र – अनेन । एव । प्राणमिति प्र – अनम् । समिति । अर्द्धयति । वीति । अन्यात् । **23 (50)**

**TS 5.5.5.3**

द्वितीयामुपधाय व्यानेनैव व्यान॑ समर्द्धयत्यपान्यात् तृतीयामुपधाया–पानेनैवापान॑ समर्द्धयत्यथो प्राणैरेवैन॑ समिन्धे भूर्भुवः सुवरिति स्वयमातृण्णा उप दधातीमे वै लोकाः स्वयमातृण्णा एताभिः खलु वै व्याहृतीभिः प्रजापतिः प्राजायत यदेताभिर्व्याहृतीभिः स्वयमातृण्णा उपदधातीमानेव लोकानुपधायैषु– [ ] **24**

**TS 5.5.5.3 - Padam**

द्वितीयाम् । उपधायेत्युप – धाय । व्यानेनेति वि – अनेन । एव ।
व्यानमिति वि – अनम् । समिति । अर्द्धयति । अपेति । अन्यात् ।
तृतीयाम् । उपधायेत्युप – धाय । अपानेनेत्यप – अनेन । एव ।
अपानमित्यप – अनम् । समिति । अर्द्धयति । अथो इति ।
प्राणैरिति प्र – अनैः । एव । एनम् । समिति । इन्धे । भूः । भुवः ।
सुवः । इति । स्वयमातृण्णा इति स्वयं–आतृण्णाः । उपेति ।
दधाति । इमे । वै । लोकाः । स्वयमातृण्णा इति स्वयं–आतृण्णाः ।
एताभिः । खलु । वै । व्याहृतीभिरिति व्याहृति – भिः ।
प्रजापतिरिति प्रजा – पतिः । प्रेति । अजायत । यत् । एताभिः ।
व्याहृतीभिरिति व्याहृति – भिः । स्वयमातृण्णा इति
स्वयं – आतृण्णाः । उपदधातीत्युप – दधाति । इमान् । एव ।
लोकान् । उपधायेत्युप – धाय । एषु । **24 (50)**

**TS 5.5.5.4**

लोकेष्वधि प्र जायते प्राणाय व्यानायापानाय वाचे त्वा चक्षुषे त्वा तया देवतयाऽङ्गिरस्वद् ध्रुवा सीदाग्निना वै देवाः सुवर्गँ लोकमजिगाꣳसन् तेन पतितुं नाशक्नुवन् त एताश्चतस्रः स्वयमातृण्णा अपश्यन् ता दिक्षूपादधत तेन सर्वतश्चक्षुषा सुवर्गँ लोकमायन्. यच्चतस्रः स्वयमातृण्णा दिक्षूपदधाति सर्वतश्चक्षुषैव तदग्निना यजमानः ( ) सुवर्गँ लोकमेति ॥ **25**

**TS 5.5.5.4 - Padam**

लोकेषु । अधि । प्रेति । जायते । प्राणायेति प्र – अनाय । व्यानायेति वि – अनाय । अपानायेत्यप – अनाय । वाचे । त्वा । चक्षुषे । त्वा । तया । देवतया । अङ्गिरस्वत् । ध्रुवा । सीद । अग्निना । वै । देवाः । सुवर्गमिति सुवः – गम् । लोकम् । अजिगाꣳसन्न् । तेन । पतितुम् । न । अशक्नुवन्न् । ते । एताः । चतस्रः । स्वयमातृण्णा इति स्वयं – आतृण्णाः । अपश्यन्न् । ताः । दिक्षु । उपेति । अदधत । तेन ।

सर्वतश्चक्षुषेति सर्वतः – चक्षुषा । सुवर्गमिति सुवः – गम् ।
लोकम् । आयन्न् । यत् । चतस्रः । स्वयमातृण्णा इति
स्वयं – आतृण्णाः । दिक्षु । उपदधातीत्युप – दधाति ।
सर्वतश्चक्षुषेति सर्वतः – चक्षुषा । एव । तत् । अग्निना ।
यजमानः ( ) । सुवर्गमिति सुवः – गम् । लोकम् । एति ॥ **25 (53)**

***(ब्रह्मवादिनो – व्यन्या – देषु – यजमान – स्त्रीणि च) (A5)***

**TS 5.5.6.1**

अग्न आ याहि वीतय इत्याहा–ह्वतैवैन–मग्निं दूतं ँवृणीमह इत्याह हूत्वैवैनं ँवृणीते ऽग्निनाऽग्निः समिद्ध्यत इत्याह समिन्ध एवैनमग्निर्वृत्राणि जङ्घनदित्याह समिद्ध एवास्मिन्निन्द्रियं दधात्यग्नेः स्तोमं मनामह इत्याह मनुत एवैनमेतानि वा अह्ना ँ रूपाण्य– [ ] **26**

**TS 5.5.6.1 - Padam**

अग्ने । एति । याहि । वीतये । इति । आह । अह्वत । एव । एनम् ।
अग्निम् । दूतम् । वृणीमहे । इति । आह । हूत्वा । एव । एनम् ।
वृणीते । अग्निना । अग्निः । समिति । इद्ध्यते । इति । आह ।

समिति । इन्धे । एव । एनम् । अग्निः । वृत्राणि । जङ्घनत् । इति ।
आह । समिद्ध इति सं – इद्धे । एव । अस्मिन्न् । इन्द्रियम् ।
दधाति । अग्नेः । स्तोमम् । मनामहे । इति । आह । मनुते । एव ।
एनम् । एतानि । वै । अह्नाम् । रूपाणि । **26 (50)**

**<u>TS 5.5.6.2</u>**

–न्वहमेवैनं चिनुते ऽवाह्नाꣳ रूपाणि रुन्धे ब्रह्मवादिनो वदन्ति
कस्माथ् सत्याद्यातयाम्नीरन्या इष्टका अयातयाम्नी लोकंपृणेत्यैन्द्राग्नी
हि बार्.हस्पत्येति ब्रूयादिन्द्राग्नी च हि देवानां बृहस्पतिश्चा–यातयामानो
ऽनुचरवती भवत्यजामित्वाया–नुष्टुभा ऽनु चरत्यात्मा वै लोकं पृणा
प्राणो ऽनुष्टुप् तस्मात् प्राणः सर्वाण्यङ्गान्यनु चरति ता अस्य
सूददोहस – [ ] **27**

**<u>TS 5.5.6.2 - Padam</u>**

अन्वहमित्यनु – अहम् । एव । एनम् । चिनुते ।
अवेति । अह्नाम् । रूपाणि । रुन्धे । ब्रह्मवादिन इति ब्रह्म–वादिनः ।
वदन्ति । कस्मात् । सत्यात् । यातयाम्नीरिति यात – याम्नीः ।

अन्याः । इष्टकाः । अयातयाम्नीत्ययात–याम्नी । लोकंपृणेति

लोकं – पृणा । इति । ऐन्द्राग्नीत्यैन्द्र–अग्नी । हि । बार्.हस्पत्या ।

इति । ब्रूयात् । इन्द्राग्नी इतीन्द्र – अग्नी । च । हि । देवानाम् ।

बृहस्पतिः । च । अयातयामान इत्ययात – यामानः ।

अनुचरवतीत्यनुचर – वती । भवति । अजामित्वायेत्यजामि–त्वाय ।

अनुष्टुभेत्यनु – स्तुभा । अन्विति । चरति । आत्मा । वै ।

लोकंपृणेति लोकं – पृणा । प्राण इति प्र – अनः ।

अनुष्टुबित्यनु – स्तुप् । तस्मात् । प्राण इति प्र – अनः । सर्वाणि ।

अङ्गानि । अन्विति । चरति । ताः । अस्य ।

सूददोहस इति सूद – दोहसः । **27 (50)**

**TS 5.5.6.3**

इत्याह तस्मात् परुषिपरुषि रसः सोमꣳ श्रीणन्ति पृश्ञय इत्याहान्नं

वैँ पृश्ञ्यन्नमेवाव रुन्धेऽर्को वा अग्नि–रर्को ऽन्नमन्नमेवाव रुन्धे

जन्मन् देवानां वैँिश स्त्रिष्वा रोचने दिव इत्याहेमानेवास्मै लोकान्

ज्योतिष्मतः करोति यो वा इष्टकानां प्रतिष्ठां वैँद प्रत्येव तिष्ठति

तया ( ) देवतया ऽङ्गिरस्वद् ध्रुवा सीदेत्याहैषा वा इष्टकानां प्रतिष्ठा य एवं वेद प्रत्येव तिष्ठति ॥ **28**

**TS 5.5.6.3 - Padam**

इति । आह । तस्मात् । परुषिपरुषीति परुषि – परुषि । रसः । सोमम् । श्रीणन्ति । पृश्ञयः । इति । आह । अन्नम् । वै । पृश्ञि । अन्नम् । एव । अवेति । रुन्धे । अर्कः । वै । अग्निः । अर्कः । अन्नम् । अन्नम् । एव । अवेति । रुन्धे । जन्मन्न् । देवानाम् । विशः । त्रिषु । एति । रोचने । दिवः । इति । आह । इमान् । एव । अस्मै । लोकान् । ज्योतिष्मतः । करोति । यः । वै । इष्टकानाम् । प्रतिष्ठामिति प्रति – स्थाम् । वेद । प्रतीति । एव । तिष्ठति । तया ( ) । देवतया । अङ्गिरस्वत् । ध्रुवा । सीद । इति । आह । एषा । वै । इष्टकानाम् । प्रतिष्ठेति प्रति – स्था । यः । एवम् । वेद । प्रतीति । एव । तिष्ठति ॥ **28 (66)**

***(रूपाणि – सूददोहस – स्तया – षोडश च) (A6)***

**TS 5.5.7.1**

सुवर्गाय वा एष लोकाय चीयते यदग्निर्वज्र एकादशिनी यदग्नावेकादशिनीं मिनुयाद्–वज्रेणैन॑ सुवर्गा ल्लोकादन्तर्दद्ध्याद् यन्न मिनुयाथ् स्वरुभिः पशून् व्यर्द्धयेदेकयूपं मिनोति नैनं ँवज्रेण सुवर्गा ल्लोकादन्तर्दधाति न स्वरुभिः पशून् व्यर्द्धयति वि वा एष इन्द्रियेण वीर्येणर्द्ध्यते योऽग्निं चिन्व–न्नधिक्रामत्यैन्द्रिय– [ ] **29**

**TS 5.5.7.1 - Padam**

सुवर्गायेति सुवः – गाय । वै । एषः । लोकाय । चीयते । यत् । अग्निः । वज्रः । एकादशिनी । यत् । अग्नौ । एकादशिनीम् । मिनुयात् । वज्रेण । एनम् । सुवर्गादिति सुवः – गात् । लोकात् । अन्तः । दद्ध्यात् । यत् । न । मिनुयात् । स्वरुभिरिति स्वरु–भिः । पशून् । वीति । अर्द्धयेत् । एकयूपमित्येक – यूपम् । मिनोति । न । एनम् । वज्रेण । सुवर्गादिति सुवः – गात् । लोकात् । अन्तर्दधातीत्यन्तः – दधाति । न । स्वरुभिरिति स्वरु–भिः । पशून् । वीति । अर्द्धयति । वीति । वै । एषः । इन्द्रियेण । वीर्येण ।

ऋद्ध्यते । यः । अग्निम् । चिन्वन्न् । अधिक्रामतीत्यधि – क्रामति ।

ऐन्द्रिया । **29 (50)**

**TS 5.5.7.2**

–र्चा ऽऽक्रमणं प्रतीष्टकामुप दद्ध्यान्नेन्द्रियेण वीर्येण व्यृद्ध्यते

रुद्रो वा एष यदग्नि स्तस्य तिस्रः शरव्याः प्रतीची तिरश्च्यनूची

ताभ्यो वा एष आ वृश्च्यते यो ऽग्निं चिनुते ऽग्निं चित्वा

तिसृधन्व–मयाचितं ब्राह्मणाय दद्यात् ताभ्य एव नमस्करोत्यथो ताभ्य

एवाऽऽत्मानं निष्क्रीणीते यत्ते रुद्र पुरो – [ ] **30**

**TS 5.5.7.2 - Padam**

ऋचा । आक्रमणमित्या – क्रमणम् । प्रतीति । इष्टकाम् । उपेति ।

दद्ध्यात् । न । इन्द्रियेण । वीर्येण । वीति । ऋद्ध्यते । रुद्रः । वै ।

एषः । यत् । अग्निः । तस्य । तिस्रः । शरव्याः । प्रतीची । तिरश्ची ।

अनूची । ताभ्यः । वै । एषः । एति । वृश्च्यते । यः । अग्निम् ।

चिनुते । अग्निम् । चित्वा । तिसृधन्वमिति तिसृ – धन्वम् ।

अयाचितम् । ब्राह्मणाय । दद्यात् । ताभ्यः । एव । नमः । करोति ।

अथो इति । ताभ्यः । एव । आत्मानम् । निरिति । क्रीणीते । यत् ।

ते । रुद्र । पुरः । 30 (50)

**TS 5.5.7.3**

धनु स्तद्–वातो अनु वातु ते तस्मै ते रुद्र सँवथ्सरेण नमस्करोमि

यत्ते रुद्र दक्षिणा धनु स्तद्–वातो अनु वातु ते तस्मै ते रुद्र

परिवथ्सरेण नमस्करोमि यत्ते रुद्र पश्चाद्–धनु–स्तद्–वातो अनु

वातु ते तस्मै ते रुद्रेदावथ्सरेण नमस्करोमि यत्ते

रुद्रोत्तराद्–धनुस्तद् – [ ] 31

**TS 5.5.7.3 - Padam**

धनुः । तत् । वातः । अन्विति । वातु । ते । तस्मै । ते । रुद्र ।

सँवथ्सरेणेति सं – वथ्सरेण । नमः । करोमि । यत् । ते । रुद्र ।

दक्षिणा । धनुः । तत् । वातः । अन्विति । वातु । ते । तस्मै । ते ।

रुद्र । परिवथ्सरेणेति परि – वथ्सरेण । नमः । करोमि । यत् । ते ।

रुद्र । पश्चात् । धनुः । तत् । वातः । अन्विति । वातु । ते । तस्मै ।

ते । रुद्र । इदावथ्सरेण । नमः । करोमि । यत् । ते । रुद्र ।
उत्तरादित्युत् – तरात् । धनुः । तत् । **31 (50)**

**TS 5.5.7.4**

वातो अनु वातु ते तस्मै ते रुद्रेदुवथ्सरेण नमस्करोमि यत्ते रुद्रोपरि धनु स्तद्–वातो अनु वातु ते तस्मै ते रुद्र वथ्सरेण नमस्करोमि रुद्रो वा एष यदग्निः स यथा व्याघ्रः क्रुद्ध स्तिष्ठत्येवं ँवा एष एतर्.हि सञ्चितमेतैरुप तिष्ठते नमस्कारैरेवैनꣳ शमयति ये ऽग्नयः–[ ] **32**

**TS 5.5.7.4 - Padam**

वातः । अन्विति । वातु । ते । तस्मै । ते । रुद्र ।
इदुवथ्सरेणेतीदु– वथ्सरेण । नमः । करोमि । यत् । ते । रुद्र ।
उपरि । धनुः । तत् । वातः । अन्विति । वातु । ते । तस्मै । ते ।
रुद्र । वथ्सरेण । नमः । करोमि । रुद्रः । वै । एषः । यत् । अग्निः ।
सः । यथा । व्याघ्रः । क्रुद्धः । तिष्ठति । एवम् । वै । एषः । एतर्.हि ।
सञ्चितमिति सं – चितम् । एतैः । उपेति । तिष्ठते । नमस्कारैरिति
नमः–कारैः । एव । एनम् । शमयति । ये । अग्नयः । **32 (50)**

**TS 5.5.7.5**

पुरीष्याः प्रविष्टाः पृथिवीमनु ।

तेषां त्वमस्युत्तमः प्रणो जीवातवे सुव ॥

आपं त्वा ऽग्ने मनसा ऽऽपं त्वा ऽग्ने तपसा ऽऽपं त्वा ऽग्ने दीक्षया

ऽऽपं त्वाऽग्न उपसद्भि–रापं त्वाऽग्ने सुत्ययाऽऽपं त्वाऽग्ने

दक्षिणाभि–रापं त्वा ऽग्ने ऽवभृथेनापं त्वा ऽग्ने वशाया ऽऽपं त्वाऽग्ने

स्वगाकारेणेत्याहै ( ) षा वा अग्ने–राप्ति स्तयैवैन–माप्नोति ॥ **33**

**TS 5.5.7.5 - Padam**

पुरीष्याः । प्रविष्टा इति प्र – विष्टाः । पृथिवीम् । अनु ॥ तेषाम् ।

त्वम् । असि । उत्तम इत्युत् – तमः । प्रेति । नः । जीवातवे ।

सुव ॥ आपम् । त्वा । अग्ने । मनसा । आपम् । त्वा । अग्ने ।

तपसा । आपम् । त्वा । अग्ने । दीक्षया । आपम् । त्वा । अग्ने ।

उपसद्भिरित्युपसत् – भिः । आपम् । त्वा । अग्ने । सुत्यया ।

आपम् । त्वा । अग्ने । दक्षिणाभिः । आपम् । त्वा । अग्ने ।

अवभृथेनेत्यव – भृथेन । आपम् । त्वा । अग्ने । वशाया । आपम् ।

त्वा । अग्ने । स्वगाकारेणेति स्वगा – कारेण । इति ।

आह ( ) । एषा । वै । अग्नेः । आप्तिः । तया । एव । एनम् ।

आप्नोति ॥ **33 (58)**

*(ऐन्द्रिया – पुर – उत्तराद्धनुस्त– दग्नय – आहा – ष्टौ च) (A7)*

**TS 5.5.8.1**

गायत्रेण पुरस्तादुप तिष्ठते प्राणमेवास्मिन् दधाति बृहद्रथन्तराभ्यां

पक्षावोज एवास्मिन् दधात्यृतुस्थायज्ञायज्ञियेन पुच्छमृतुष्वेव प्रति

तिष्ठति पृष्ठैरुप तिष्ठते तेजो वै पृष्ठानि तेज एवास्मिन् दधाति

प्रजापतिरग्निमसृजत सोऽस्माथ् सृष्टः पराङैत् तं ँवारवन्तीयेना–

वारयत तद्–वारवन्तीयस्य वारवन्तीयत्वꣳ श्यैतेन श्येती अकुरुत

तच्छ्यैतस्य श्यैतत्वं – [ ] **34**

**TS 5.5.8.1 - Padam**

गायत्रेण । पुरस्तात् । उपेति । तिष्ठते । प्राणमिति प्र – अनम् । एव ।

अस्मिन्न् । दधाति । बृहद्रथन्तराभ्यामिति बृहत् – रथन्तराभ्याम् ।

पक्षौ । ओजः । एव । अस्मिन्न् । दधाति । ऋतुस्थायज्ञायज्ञियेन ।

पुच्छम् । ऋतुषु । एव । प्रतीति । तिष्ठति । पृष्ठैः । उपेति । तिष्ठते ।
तेजः । वै । पृष्ठानि । तेजः । एव । अस्मिन्न् । दधाति ।
प्रजापतिरिति प्रजा – पतिः । अग्निम् । असृजत । सः । अस्मात् ।
सृष्टः । पराङ् । ऐत् । तम् । वारवन्तीयेनेति वार – वन्तीयेन ।
अवारयत । तत् । वारवन्तीयस्येति वार – वन्तीयस्य ।
वारवन्तीयत्वमिति वारवन्तीय – त्वम् । श्यैतेन । श्येती । अकुरुत ।
तत् । श्यैतस्य । श्यैतत्वमिति श्यैत – त्वम् । **34 (50)**

**TS 5.5.8.2**

ँयद्–वारवन्तीयेनोपतिष्ठते वारयत एवैनꣳ श्यैतेन श्येती कुरुते
प्रजापतेर्.हृदयेना–पिपक्षं प्रत्युप तिष्ठते प्रेमाणमेवास्य गच्छति
प्राच्या त्वा दिशा सादयामि गायत्रेण छन्दसा ऽग्निना देवतया ऽग्नेः
शीर्ष्णाग्नेः शिर उप दधामि दक्षिणया त्वा दिशा सादयामि
त्रैष्टुभेन छन्दसेन्द्रेण देवतया ऽग्नेः पक्षेणाग्नेः पक्षमुप दधामि
प्रतीच्या त्वा दिशा सादयामि – [ ] **35**

**TS 5.5.8.2 - Padam**

यत् । वारवन्तीयेनेति वार – वन्तीयेन । उपतिष्ठत इत्युप – तिष्ठते ।
वारयते । एव । एनम् । श्यैतेन । श्येती । कुरुते । प्रजापतेर्.हृदयेन ।
अपिपक्षमित्यपि – पक्षम् । प्रति । उपेति । तिष्ठते । प्रेमाणम् । एव ।
अस्य । गच्छति । प्राच्या । त्वा । दिशा । सादयामि । गायत्रेण ।
छन्दसा । अग्निना । देवतया । अग्नेः । शीर्ष्णा । अग्नेः । शिरः ।
उपेति । दधामि । दक्षिणया । त्वा । दिशा । सादयामि । त्रैष्टुभेन ।
छन्दसा । इन्द्रेण । देवतया । अग्नेः । पक्षेण । अग्नेः । पक्षम् ।
उपेति । दधामि । प्रतीच्या । त्वा । दिशा । सादयामि । **35 (50)**

**TS 5.5.8.3**

जागतेन छन्दसा सवित्रा देवतया ऽग्नेः पुच्छेनाग्नेः पुच्छमुप
दधाम्युदीच्या त्वा दिशा सादयाम्यानुष्टुभेन छन्दसा मित्रावरुणाभ्यां
देवतया ऽग्नेः पक्षेणाग्नेः पक्षमुप दधाम्यूर्द्ध्वया त्वा दिशा सादयामि
पाङ्क्तेन छन्दसा बृहस्पतिना देवतया ऽग्नेः पृष्ठेनाग्नेः पृष्ठमुप दधामि
यो वा अपात्मानमग्निं चिनुते ऽपात्मा ऽमुष्मिन् ँल्लोके भवति यः

सात्मानं चिनुते ( ) सात्मा ऽमुष्मिन् ँल्लोके भवत्यात्मेष्टका उप दधात्येष वा अग्नेरात्मा सात्मानमेवाग्निं चिनुते सात्मा ऽमुष्मिन् ँल्लोके भवति य एवं ँवेद ॥ 36

**TS 5.5.8.3 - Padam**

जागतेन । छन्दसा । सवित्रा । देवतया । अग्नेः । पुच्छेन । अग्नेः । पुच्छम् । उपेति । दधामि । उदीच्या । त्वा । दिशा । सादयामि । आनुष्टुभेनेत्यानु – स्तुभेन । छन्दसा । मित्रावरुणाभ्यामिति मित्रा–वरुणाभ्याम् । देवतया । अग्नेः । पक्षेण । अग्नेः । पक्षम् । उपेति । दधामि । ऊर्द्ध्वया । त्वा । दिशा । सादयामि । पाङ्क्तेन । छन्दसा । बृहस्पतिना । देवतया । अग्नेः । पृष्ठेन । अग्नेः । पृष्ठम् । उपेति । दधामि । यः । वै । अपात्मानमित्यप–आत्मानम् । अग्निम् । चिनुते । अपात्मेत्यप – आत्मा । अमुष्मिन्न् । लोके । भवति । यः । सात्मानमिति स – आत्मानम् । चिनुते ( ) । सात्मेति स–आत्मा ।

अमुष्मिन्न् । लोके । भवति । आत्मेष्टका इत्यात्म–इष्टकाः । उपेति । दधाति । एषः । वै । अग्नेः । आत्मा । सात्मानमिति स–आत्मानम् । एव । अग्निम् । चिनुते । सात्मेति स – आत्मा । अमुष्मिन्न् । लोके । भवति । यः । एवम् । वेद ॥ **36 (72)**

*(श्यैतत्वं – प्रतीच्या त्वा दिशा सादयामि – यः सात्मानं चिनुते – द्वाविꣳशतिश्च) (A8)*

**TS 5.5.9.1**

अग्न उदधे या त इषुर्युवा नाम तया नो मृड तस्यास्ते नम स्तस्या स्त उप जीवन्तो भूयास्माग्ने दुद्ध्र गह्य किꣳशिल वन्य या त इषुर्युवा नाम तया नो मृड तस्यास्ते नम स्तस्या स्त उप जीवन्तो भूयास्म पञ्च वा एतेऽग्नयो यच्चितय उदधिरेव नाम प्रथमो दुद्ध्रो– [ ] **37**

**TS 5.5.9.1 - Padam**

अग्ने । उदध इत्युद – धे । या । ते । इषुः । युवा । नाम । तया । नः । मृड । तस्याः । ते । नमः । तस्याः । ते । उपेति । जीवन्तः ।

भूयास्म । अग्ने । दुद्ध्र । गह्य । कि॒ꣳशिल । वन्य । या । ते ।

इषुः । युवा । नाम । तया । नः । मृड । तस्याः । ते । नमः ।

तस्याः । ते । उपेति । जीवन्तः । भूयास्म । पञ्च । वै । एते ।

अग्नयः । यत् । चितयः । उदधिरित्युद – धिः । एव । नाम ।

प्रथमः । दुद्ध्रः । **37 (50)**

**TS 5.5.9.2**

द्वितीयो गह्यस्तृतीयः कि॒ꣳशिलश्चतुर्थो वन्यः पञ्चमस्तेभ्यो

यदाहुतीर्न जुहुयादद्ध्वर्युं च यजमानं च प्र दहेयुर्यदेता

आहुतीर्जुहोति भागधेयेनैवैनाञ्छमयति नाऽऽर्तिमार्च्छत्यद्ध्वर्युर्न

यजमानो वाङ् म आसन् नसोः प्राणोऽक्ष्योश्चक्षुः कर्णयोः श्रोत्रं

बाहुवोर्बल–मूरुवोरोजोऽरिष्टा विश्वान्यङ्गानि तनू– [ ] **38**

**TS 5.5.9.2 - Padam**

द्वितीयः । गह्यः । तृतीयः । कि॒ꣳशिलः । चतुर्थः । वन्यः ।

पञ्चमः । तेभ्यः । यत् । आहुतीरित्या – हुतीः । न । जुहुयात् ।

अद्ध्वर्युम् । च । यजमानम् । च । प्रेति । दहेयुः । यत् । एताः ।

आहुतीरित्या – हुतीः । जुहोति । भागधेयेनेति भाग–धेयेन । एव ।

एनान् । शमयति । न । आर्तिम् । एति । ऋच्छति । अद्ध्वर्युः । न ।

यजमानः । वाक् । मे । आसन्न् । नसोः । प्राण इति प्र – अनः ।

अक्ष्योः । चक्षुः । कर्णयोः । श्रोत्रम् । बाहुवोः । बलम् । ऊरुवोः ।

ओजः । अरिष्टा । विश्वानि । अङ्गानि । तनूः । **38 (50)**

**TS 5.5.9.3**

–स्तनुवा मे सह नमस्ते अस्तु मा मा हि॒ꣳसीरप वा एतस्मात्

प्राणाः क्रामन्ति यो ऽग्निं चिन्व–न्नधिक्रामति वाङ् म आसन् नसोः

प्राण इत्याह प्राणानेवाऽऽत्मन् धत्ते यो रुद्रो अग्नौ यो अफ्सु

य ओषधीषु यो रुद्रो विश्वा भुवना ऽऽविवेश तस्मै रुद्राय नमो

अस्त्वाहुतिभागा वा अन्ये रुद्रा हविर्भागा – [ ] **39**

**TS 5.5.9.3 - Padam**

तनुवा । मे । सह । नमः । ते । अस्तु । मा । मा । हि॒ꣳसीः ।

अपेति । वै । एतस्मात् । प्राणा इति प्र – अनाः । क्रामन्ति । यः ।

अग्निम् । चिन्वन्न् । अधिक्रामतीत्यधि – क्रामति । वाक् । मे ।

आसन्न् । नसोः । प्राण इति प्र – अनः । इति । आह । प्राणानिति

प्र – अनान् । एव । आत्मन्न् । धत्ते । यः । रुद्र ः । अग्नौ । यः ।

अफ्स्वित्यप् – सु । यः । ओषधीषु । यः । रुद्रः । विश्वा । भुवना ।

आविवेशेत्या – विवेश । तस्मै । रुद्राय । नमः । अस्तु ।

आहुतिभागा इत्याहुति – भागाः । वै । अन्ये । रुद्राः ।

हविर्भागा इति हविः – भागाः । **39 (50)**

**<u>TS 5.5.9.4</u>**

अन्ये शतरुद्रीय९ं हुत्वा गावीधुकं चरुमेतेन यजुषा चरमायामिष्टकायां

नि दद्ध्याद्–भागधेयेनैवैन९ं शमयति तस्य त्वै शतरुद्रीय९ं

हुतमित्याहुर्यस्यैतदग्नौ क्रियत इति वसवस्त्वा रुद्रैः पुरस्तात् पान्तु

पितरस्त्वा यमराजानः पितृभिर्दक्षिणतः पान्त्वादित्यास्त्वा विश्वैर्देवैः

पश्चात् पान्तु द्युतान स्त्वा मारुतो मरुद्भि–रुत्तरतः पातु – [ ] **40**

**<u>TS 5.5.9.4 - Padam</u>**

अन्ये । शतरुद्रीयमिति शत – रुद्रीयम् । हुत्वा । गावीधुकम् ।

चरुम् । एतेन । यजुषा । चरमायाम् । इष्टकायाम् । नीति । दद्ध्यात् ।

भागधेयेनेति भाग – धेयेन । एव । एनम् । शमयति । तस्य । तु ।
वै । शतरुद्रीयमिति शत – रुद्रीयम् । हुतम् । इति । आहुः ।
यस्य । एतत् । अग्नौ । क्रियते । इति । वसवः । त्वा । रुद्रैः ।
पुरस्तात् । पान्तु । पितरः । त्वा । यमराजान इति यम – राजानः ।
पितृभिरिति पितृ – भिः । दक्षिणतः । पान्तु । आदित्याः । त्वा ।
विश्वैः । देवैः । पश्चात् । पान्तु । द्युतानः । त्वा । मारुतः ।
मरुद्भिरिति मरुत् – भिः । उत्तरत इत्युत् – तरतः । पातु । **40 (50)**

**TS 5.5.9.5**

देवास्त्वेन्द्रज्येष्ठा वरुणराजानो ऽधस्ताच्चो–परिष्ठाच्च पान्तु
न वा एतेन पूतो न मेद्ध्यो न प्रोक्षितो यदेनमतः प्राचीनं प्रोक्षति
यथ् सञ्चितमाज्येन प्रोक्षति तेन पूतस्तेन मेद्ध्यस्तेन प्रोक्षितः ॥ **41**

**TS 5.5.9.5 - Padam**

देवाः । त्वा । इन्द्रज्येष्ठा इतीन्द्र – ज्येष्ठाः । वरुणराजान इति
वरुण – राजानः । अधस्तात् । च । उपरिष्ठात् । च । पान्तु । न ।
वै । एतेन । पूतः । न । मेद्ध्यः । न । प्रोक्षित इति प्र – उक्षितः ।

यत् । एनम् । अतः । प्राचीनम् । प्रोक्षतीति प्र – उक्षति । यथ् ।
सञ्चितमिति सं – चितम् । आज्येन । प्रोक्षतीति प्र – उक्षति ।
तेन । पूतः । तेन । मेद्ध्यः । तेन ।
प्रोक्षित इति प्र–उक्षितः ॥ **41 (32)**

*(दुध्र – स्तनूरः – हविर्भागाः – पातु – द्वात्रिंशच्च) (A9)*

**TS 5.5.10.1**

समीची नामासि प्राची दिक् तस्यास्ते ऽग्निरधिपति रसितो रक्षिता यश्चाधिपति र्यश्च गोप्ता ताभ्यां नम स्तौ नो मृडयतां ते यं द्विष्मो यश्च नो द्वेष्टि तं वां जंभे दधाम्योजस्विनी नामासि दक्षिणा दिक् तस्यास्त इन्द्रो ऽधिपतिः पृदाकुः प्राची नामासि प्रतीची दिक्
तस्यास्ते – [ ] **42**

**TS 5.5.10.1 - Padam**

समीची । नाम । असि । प्राची । दिक् । तस्याः । ते । अग्निः ।
अधिपतिरित्यधि – पतिः । असितः । रक्षिता । यः । च ।
अधिपतिरित्यधि–पतिः । यः । च । गोप्ता । ताभ्याम् । नमः । तौ ।

नः । मृडयताम् । ते । यम् । द्विष्मः । यः । च । नः । द्वेष्टि । तम् ।

वाम् । जम्भे । दधामि । ओजस्विनी । नाम । असि । दक्षिणा ।

दिक् । तस्याः । ते । इन्द्रः । अधिपतिरित्यधि – पतिः । पृदाकुः ।

प्राची । नाम । असि । प्रतीची । दिक् । तस्याः । ते । **42 (50)**

**<u>TS 5.5.10.2</u>**

सोमो ऽधिपतिः स्वजो ऽवस्थावा नामा–स्युदीची दिक् तस्यास्ते

वरुणोऽधिपति–स्तिरश्च राजिरधिपत्नी नामासि बृहती दिक् तस्यास्ते

बृहस्पति–रधिपतिः श्वित्रो वशिनी नामासीयं दिक् तस्यास्ते

यमो ऽधिपतिः कल्माषग्रीवो रक्षिता यश्चाधिपति र्यश्च गोप्ता ताभ्यां

नमस्तौ नो मृडयतां ते यं द्विष्मो यश्च – [ ] **43**

**<u>TS 5.5.10.2 - Padam</u>**

सोमः । अधिपतिरित्यधि – पतिः । स्वज इति स्व – जः ।

अवस्थावेत्यव – स्थावा । नाम । असि । उदीची । दिक् । तस्याः ।

ते । वरुणः । अधिपतिरित्यधि–पतिः । तिरश्चराजिरिति तिरश्च–राजिः ।

अधिपत्नीत्यधि–पत्नी । नाम । असि । बृहती । दिक् । तस्याः । ते ।

बृहस्पतिः । अधिपतिरित्यधि – पतिः । श्वित्रः । वशिनी । नाम ।
असि । इयं । दिक् । तस्याः । ते । यमः । अधिपतिरित्यधि–पतिः ।
कल्माषग्रीव इति कल्माष – ग्रीवः । रक्षिता । यः । च ।
अधिपतिरित्यधि–पतिः । यः । च । गोप्ता । ताभ्याम् । नमः । तौ ।
नः । मृडयताम् । ते । यम् । द्विष्मः । यः । च । **43 (50)**

**TS 5.5.10.3**

नो द्वेष्टि तं ँवां जंभे दधाम्येता वै देवता अग्निं चित९ रक्षन्ति ताभ्यो यदाहुतीर्न जुहुयादद्ध्वर्युं च यजमानं च ध्यायेयुर्यदेता आहुतीर्जुहोति भागधेयेनै–वैनाञ्छमयति नाऽऽ*र्तिमार्च्छत्यद्ध्वर्युर्न यजमानो हेतयो नाम स्थ तेषां ँवः पुरो गृहा अग्निर्व इषवः सलिलो निलिंपा नाम – [ ] 44

**TS 5.5.10.3 - Padam**

नः । द्वेष्टि । तम् । वाम् । जम्भे । दधामि । एताः । वै । देवताः ।
अग्निम् । चितम् । रक्षन्ति । ताभ्यः । यत् । आहुतीरित्या – हुतीः ।
न । जुहुयात् । अद्ध्वर्युम् । च । यजमानम् । च । ध्यायेयुः । यत् ।

एताः । आहुतीरित्या – हुतीः । जुहोति । भागधेयेनेति भाग–धेयेन ।
एव । एनान् । शमयति । न । आर्तिम् । एति । ऋच्छति । अद्ध्वर्युः ।
न । यजमानः । हेतयः । नाम । स्थ । तेषाम् । वः । पुरः । गृहाः ।
अग्निः । वः । इषवः । सलिलः । निलिंपा इति नि–लिंपाः । नाम । **44 (50)**

**TS 5.5.10.4**

स्थ तेषां ँवो दक्षिणा गृहाः पितरो व इषवः सगरो वज्रिणो नाम स्थ
तेषां ँवः पश्चाद् गृहाः स्वप्नो व इषवो गह्वरो ऽवस्थावानो नाम स्थ
तेषां ँव उत्तराद् गृहा आपो व इषवः समुद्रो ऽधिपतयो नाम स्थ
तेषां ँव उपरि गृहा वर्.षं ँव इषवोऽवस्वान् क्रव्या नाम स्थ
पार्थिवा–स्तेषां ँव इह गृहा– [ ] **45**

**TS 5.5.10.4 - Padam**

स्थ । तेषाम् । वः । दक्षिणा । गृहाः । पितरः । वः । इषवः ।
सगरः । वज्रिणः । नाम । स्थ । तेषाम् । वः । पश्चात् । गृहाः ।
स्वप्नः । वः । इषवः । गह्वरः । अवस्थावान इत्यव – स्थावानः ।
नाम । स्थ । तेषाम् । वः । उत्तरादित्युत् – तरात् । गृहाः । आपः ।

वः । इषवः । समुद्रः । अधिपतय इत्यधि – पतयः । नाम । स्थ ।

तेषाम् । वः । उपरि । गृहाः । वर्.षम् । वः । इषवः । अवस्वान् ।

क्रव्याः । नाम । स्थ । पार्थिवाः । तेषाम् । वः । इह ।

गृहाः । **45 (50)**

**TS 5.5.10.5**

अन्नं ँव इषवो ऽनिमिषो वातनामं तेभ्यो वो नमस्ते नो मृडयत

ते यं द्विष्मो यश्च नो द्वेष्टि तं ँवो जंभे दधामि हुतादो वा अन्ये देवा

अहुतादो ऽन्ये तानग्निचिदेवोभयान् प्रीणाति दद्ध्ना मधुमिश्रेणैता

आहुतीर्जुहोति भागधेयेनैवैनान् प्रीणात्यथो खल्वाहुरिष्टका वै देवा

अहुताद इत्य – [ ] **46**

**TS 5.5.10.5 - Padam**

अन्नम् । वः । इषवः । निमिष इति नि – मिषः । वातनाममिति

वात – नामम् । तेभ्यः । वः । नमः । ते । नः । मृडयत । ते । यम् ।

द्विष्मः । यः । च । नः । द्वेष्टि । तम् । वः । जम्भे । दधामि । हुताद

इति हुत – अदः । वै । अन्ये । देवाः । अहुताद इत्यहुत – अदः ।

अन्ये । तान् । अग्निचिदित्यग्नि – चित् । एव । उभयान् । प्रीणाति ।
दद्ध्ना । मधुमिश्रेणेति मधु – मिश्रेण । एताः । आहुतीरित्या–हुतीः ।
जुहोति । भागधेयेनेति भाग – धेयेन । एव । एनान् । प्रीणाति ।
अथो इति । खलु । आहुः । इष्टकाः । वै । देवाः ।
अहुताद इत्यहुत – अदः । इति । **46 (50)**

**TS 5.5.10.6**

–नुपरिक्रामं जुहोत्यपरिवर्गमेवैनान् प्रीणातीम७ स्तनमूर्जस्वन्तं
धयापां प्रप्यातमग्ने सरिरस्य मद्ध्ये ।
उथ्सं जुषस्व मधुमन्तमूर्व समुद्रिय८ं सदनमा विशस्व ॥
यो वा अग्निं प्रयुज्य न विमुञ्चति यथा ऽश्वो युक्तो ऽविमुच्यमानः
क्षुद्ध्यन् पराभवत्येवमस्याग्निः परा भवति तं पराभवन्तं ँयजमानो
ऽनु परा भवति सो ऽग्निं चित्वा लूक्षो– [ ] **47**

**TS 5.5.10.6 - Padam**

अनुपरिक्राममित्यनु – परिक्रामम् । जुहोति ।
अपरिवर्गमित्यपरि – वर्गम् । एव । एनान् । प्रीणाति । इमम् ।

स्तनम् । ऊर्जस्वन्तम् । धय । अपाम् । प्रप्यातमिति प्र–प्यातम् ।
अग्ने । सरिरस्य । मद्ध्ये ॥ उत्सम् । जुषस्व । मधुमन्तमिति
मधु–मन्तम् । ऊर्व । समुद्रियम् । सदनम् । एति । विशस्व ॥ यः ।
वै । अग्निम् । प्रयुज्येति प्र – युज्य । न । विमुञ्चतीति
वि – मुञ्चति । यथा । अश्वः । युक्तः । अविमुच्यमान
इत्यवि – मुच्यमानः । क्षुद्ध्यन्न् । पराभवतीति परा – भवति ।
एवम् । अस्य । अग्निः । परेति । भवति । तम् । पराभवन्तमिति
परा – भवन्तम् । यजमानः । अनु । परेति । भवति । सः ।
अग्निम् । चित्वा । लूक्षः । **47 (50)**

**<u>TS 5.5.10.7</u>**

भवतीम॰ स्तनमूर्जस्वन्तं धयापामित्याज्यस्य पूर्णा॰ स्रुचं जुहोत्येष वा अग्नेर्विमोको विमुच्यैवास्मा अन्नमपि दधाति तस्मादाहुर्यश्चैवं वेद यश्च न सुधाय॰ ह वै वाजी सुहितो दधातीत्यग्निर्वाव वाजी तमेव तत् प्रीणाति स एनं प्रीतः प्रीणाति वसीयान् भवति ( ) ॥ **48**

**TS 5.5.10.7 - Padam**

भवति । इमम् । स्तनम् । ऊर्जस्वन्तम् । धय । अपाम् । इति ।
आज्यस्य । पूर्णाम् । स्रुचम् । जुहोति । एषः । वै । अग्नेः । विमोक
इति वि – मोकः । विमुच्येति वि – मुच्य । एव । अस्मै । अन्नम् ।
अपीति । दधाति । तस्मात् । आहुः । यः । च । एवम् । वेद । यः ।
च । न । सुधायमिति सु – धायम् । ह । वै । वाजी ।
सुहित इति सु – हितः । दधाति । इति । अग्निः । वाव । वाजी ।
तम् । एव । तत् । प्रीणाति । सः । एनम् । प्रीतः । प्रीणाति ।
वसीयान् । भवति ( ) ॥ **48 (50)** *(प्रतीची दिक्तस्यास्ते–द्विष्मो यश्च–निलिम्पा ना–मे ह गृहा–इति–लूक्षो–वसीयान् भवति) (A10)*

**TS 5.5.11.1**

इन्द्राय राज्ञे सूकरो वरुणाय राज्ञे कृष्णो यमाय राज्ञ ऋश्य ऋषभाय
राज्ञे गवयः शार्दूलाय राज्ञे गौरः पुरुषराजाय मर्कटः क्षिप्रश्येनस्य
वर्तिका नीलङ्गोः क्रिमिः सोमस्य राज्ञः कुलुङ्गः सिन्धोः
शि͠शुमारो हिमवतो हस्ती ॥ **49**

**TS 5.5.11.1 - Padam**

इन्द्राय । राज्ञे । सूकरः । वरुणाय । राज्ञे । कृष्णः । यमाय । राज्ञे ।
ऋश्यः । ऋषभाय । राज्ञे । गवयः । शार्दूलाय । राज्ञे । गौरः ।
पुरुषराजायेति पुरुष – राजाय । मर्कटः । क्षिप्रश्येनस्येति
क्षिप्र – श्येनस्य । वर्तिका । नीलङ्गोः । क्रिमिः । सोमस्य । राज्ञः ।
कुलुङ्गः । सिन्धोः । शिꣳशुमारः । हिमवत इति हिम – वतः ।
हस्ती ॥ **49 (28)**

*(इन्द्राय राज्ञे – ऽष्टाविꣳशतिः) (A11)*

**TS 5.5.12.1**

मयुः प्राजापत्य ऊलो हलीक्ष्णो वृषदꣳशस्ते धातुः सरस्वत्यै
शारिः श्येता पुरुषवाख् सरस्वते शुकः श्येतः पुरुषवागारण्योऽजो
नकुलः शका ते पौष्णा वाचे क्रौञ्चः ॥ **50**

**TS 5.5.12.1 - Padam**

मयुः । प्राजापत्य इति प्राजा – पत्यः । ऊलः । हलीक्ष्णः ।
वृषदꣳशः । ते । धातुः । सरस्वत्यै । शारिः । श्येता ।

पुरुषवागिति पुरुष-वाक् । सरस्वते । शुकः । श्येतः । पुरुषवागिति पुरुष-वाक् । आरण्यः । अजः । नकुलः । शका । ते । पौष्णाः । वाचे । क्रौञ्चः ॥ **50 (23)**

*(मयु – स्त्रयोविꣳशतिः) (A12)*

**TS 5.5.13.1**

अपां नप्त्रे जषो नाक्रो मकरः कुलीकयस्तेऽकूपारस्य वाचे पैङ्गराजो भगाय कुषीतक आती वाहसो दर्विदा ते वायव्या दिग्भ्यश्चक्रवाकः ॥ **51**

**TS 5.5.13.1 - Padam**

अपाम् । नप्त्रे । जषः । नाक्रः । मकरः । कुलीकयः । ते । अकूपारस्य । वाचे । पैङ्गराज इति पैङ्ग-राजः । भगाय । कुषीतकः । आती । वाहसः । दर्विदा । ते । वायव्याः । दिग्भ्य इति दिक्-भ्यः । चक्रवाकः ॥ **51 (19)**

*(अपा – मेकान्नविꣳशतिः) (A13)*

**TS 5.5.14.1**

बलायाजगर आखुः सृजया शयण्डकस्ते मैत्रा मृत्यवे ऽसितो मन्यवे स्वजः कुंभीनसः पुष्करसादो लोहिताहिस्ते त्वाष्ट्राः प्रतिश्रुत्कायै वाहसः ॥ **52**

**TS 5.5.14.1 - Padam**

बलाय । अजगरः । आखुः । सृजया । शयण्डकः । ते । मैत्राः । मृत्यवे । असितः । मन्यवे । स्वज इति स्व – जः । कुंभीनस इति कुंभी – नसः । पुष्करसाद इति पुष्कर – सादः । लोहिताहिरिति लोहित–अहिः । ते । त्वाष्ट्राः । प्रतिश्रुत्काया इति प्रति – श्रुत्कायै । वाहसः ॥ **52 (18)**

*(बलाया – ष्टादश) (A14)*

**TS 5.5.15.1**

पुरुषमृगश्चन्द्रमसे गोधा कालका दार्वाघाटस्ते वनस्पतीनामेण्यह्ने कृष्णो रात्रियै पिकः क्ष्विङ्का नीलशीर्ष्णी ते ऽर्यम्णे धातुः कत्कटः ॥ **53**

**TS 5.5.15.1 - Padam**

पुरुषमृग इति पुरुष – मृगः । चन्द्रमसे । गोधा । कालका । दार्वाघाट इति दारु–आघातः । ते । वनस्पतीनाम् । एणी । अह्ने । कृष्णः । रात्रियै । पिकः । क्ष्विङ्क्षाः । नीलशीर्ष्णीति नील – शीर्ष्णी । ते । अर्यम्णे । धातुः । कत्कटः ॥ **53 (18)**

*(पुरुषमृगो–ऽष्टादश) (A15)*

**TS 5.5.16.1**

सौरी बलाकर्श्यो मयूरः श्येनस्ते गन्धर्वाणां ँवसूनां कपिञ्जलो रुद्राणां तित्तिरी रोहित् कुण्डृणाची गोलत्तिका ता अफ्सरसा–मरण्याय सृमरः ॥ **54**

**TS 5.5.16.1 - Padam**

सौरी । बलाका । ऋश्यः । मयूरः । श्येनः । ते । गन्धर्वाणाम् । वसूनाम् । कपिञ्जलः । रुद्राणाम् । तित्तिरिः । रोहित् । कुण्डृणाची । गोलत्तिका । ताः । अफ्सरसाम् । अरण्याय । सृमरः ॥ **54 (18)**

*(सौ–र्यष्टादश) (A16)*

**TS 5.5.17.1**

पृषतो वैश्वदेवः पित्वो न्यङ्कुः कश स्ते ऽनुमत्या अन्यवापो

ऽर्द्धमासानां मासां कश्यपः क्वयिः कुटरुर्दात्यौहस्ते सिनीवाल्यै

बृहस्पतये शित्पुटः ॥ **55**

**TS 5.5.17.1 - Padam**

पृषतः । वैश्वदेव इति वैश्व – देवः । पित्वः । न्यङ्कुः । कशः । ते ।

अनुमत्या इत्यनु – मत्यै । अन्यवाप इत्यन्य – वापः ।

अर्द्धमासानामित्यर्द्ध – मासानाम् । मासाम् । कश्यपः । क्वयिः ।

कुटरुः । दात्यौहः । ते । सिनीवाल्यै । बृहस्पतये ।

शित्पुटः ॥ **55 (18)**

*(पृषतो– ऽष्टादश) (A17)*

**TS 5.5.18.1**

शका भौमी पान्त्रः कशो मान्थीलवस्ते पितृणामृतूनां जहका

सँवथ्सराय लोपा कपोत उलूकः शशस्ते नैर्.ऋताः कृकवाकुः

सावित्रः ॥ **56**

**TS 5.5.18.1 - Padam**

शका । भौमी । पान्त्रः । कशः । मान्थीलवः । ते । पितृणाम् ।
ऋतूनाम् । जहका । सँवथ्सरायेति सं–वथ्सराय । लोपा । कपोतः ।
उलूकः । शशः । ते । नैर्.ऋता इति नैः – ऋताः । कृकवाकुः ।
सावित्रः ॥ **56 (18)**

*(शका – ष्टादश ) (A18)*

**TS 5.5.19.1**

रुरू रौद्रः कृकलासः शकुनिः पिप्पका ते शरव्यायै हरिणो मारुतो
ब्रह्मणे शार्गस्तरक्षुः कृष्णः श्वा चतुरक्षो गर्दभस्त इतरजनानामग्नये
धूङ्क्ष्णा ॥ **57**

**TS 5.5.19.1 - Padam**

रुरुः । रौद्रः । कृकलासः । शकुनिः । पिप्पका । ते । शरव्यायै ।
हरिणः । मारुतः । ब्रह्मणे । शार्गः । तरक्षुः । कृष्णः । श्वा । चतुरक्ष
इति चतुः – अक्षः । गर्दभः । ते । इतरजनानामितीतर–जनानाम् ।
अग्नये । धूंक्ष्णा ॥ **57 (20)** *(रुरु – विँशतिः) (A19)*

**TS 5.5.20.1**

अलज आन्तरिक्ष उद्रो मद्गुः प्लव स्ते ऽपामदित्यै

ह॒ंसॅसाचि–रिन्द्राण्यै कीर्.शा गृद्ध्रः शितिकक्षी वार्द्ध्राणसस्ते

दिव्या द्यावापृथिव्या श्वावित् ॥ **58**

**TS 5.5.20.1 - Padam**

अलजः । आन्तरिक्षः । उद्रः । मद्गुः । प्लवः । ते । अपाम् ।

अदित्यै । हंॅससाचिरिति हंॅस – साचिः । इन्द्राण्यै । कीर्.शा ।

गृध्रः । शितिकक्षीति शिति – कक्षी । वार्द्ध्राणसः । ते । दिव्याः ।

द्यावापृथिव्येति द्यावा – पृथिव्या । श्वाविदिति श्व – वित् ॥ **58 (18)**

*(अलजो – ऽष्टादश ) (A20)*

**TS 5.5.21.1**

सुपर्णः पार्जन्यो हंॅसो वृको वृषदंॅशस्त ऐन्द्रा अपामुद्रो ऽर्यम्णे

लोपाशः सिंॅहो नकुलो व्याघ्रस्ते महेन्द्राय कामाय परस्वान् ॥ **59**

**TS 5.5.21.1 - Padam**

सुपर्ण इति सु – पर्णः । पार्जन्यः । हंॅसः । वृकः । वृषदंॅशः ।

ते । ऐन्द्राः । अपाम् । उद्रः । अर्यम्णे । लोपाशः । सिंॅहः ।

नकुलः । व्याघ्रः । ते । महेन्द्रायेति महा – इन्द्राय । कामाय ।
परस्वान् ॥ **59 (18)**

*(सुपर्णो – ऽष्टादश) (A21)*

**TS 5.5.22.1**

आग्नेयः कृष्णग्रीवः सारस्वती मेषी बभ्रुः सौम्यः पौष्णः श्यामः शितिपृष्ठो बार्.हस्पत्यः शिल्पो वैश्वदेव ऐन्द्रो ऽरुणो मारुतः कल्माष ऐन्द्राग्नः सꣳहितो ऽधोरामः सावित्रो वारुणः पेत्वः ॥ **60**

**TS 5.5.22.1 - Padam**

आग्नेयः । कृष्णग्रीव इति कृष्ण – ग्रीवः । सारस्वती । मेषी । बभ्रुः । सौम्यः । पौष्णः । श्यामः । शितिपृष्ठ इति शिति –पृष्ठः । बार्.हस्पत्यः । शिल्पः । वैश्वदेव इति वैश्व – देवः । ऐन्द्रः । अरुणः । मारुतः । कल्माषः । ऐन्द्राग्न इत्यैन्द्र – अग्नः । सꣳहित इति सं – हितः । अधोराम इत्यधः – रामः । सावित्रः । वारुणः । पेत्वः ॥ **60 (22)**

*(आग्नेयो – द्वाविꣳशतिः) (A22)*

**TS 5.5.23.1**

अश्वस्तूपरो गोमृगस्ते प्राजापत्या आग्नेयौ कृष्णग्रीवौ त्वाष्ट्रौ लोमशसक्थौ शितिपृष्ठौ बार्.हस्पत्यौ धात्रे पृषोदरः सौर्यो बलक्षः पेत्वः ॥ **61**

**TS 5.5.23.1 - Padam**

अश्वः । तूपरः । गोमृग इति गो – मृगः । ते । प्राजापत्या इति प्राजा – पत्याः । आग्नेयौ । कृष्णग्रीवाविति कृष्ण – ग्रीवौ । त्वाष्ट्रौ । लोमशसक्थाविति लोमश – सक्थौ । शितिपृष्ठाविति शिति – पृष्ठौ । बार्.हस्पत्यौ । धात्रे । पृषोदर इति पृष – उदरः । सौर्यः । बलक्षः । पेत्वः ॥ **61 (16)**

*(अश्वः – षोडश) (A23)*

**TS 5.5.24.1**

अग्नयेऽनीकवते रोहिताञ्जि–रनड्वानधोरामौ सावित्रौ पौष्णौ रजतनाभी वैश्वदेवौ पिशङ्गौ तूपरौ मारुतः कल्माष आग्नेयः कृष्णो ऽजः सारस्वती मेषी वारुणः कृष्ण एकशितिपात् पेत्वः ॥ **62**

**TS 5.5.24.1 - Padam**

अग्नये । अनीकवत इत्यनीक–वते । रोहिताञ्जिरिति
रोहित–अञ्जिः । अनड्वान् । अधोरामावित्यधः – रामौ । सावित्रौ ।
पौष्णौ । रजतनाभी इति रजत – नाभी । वैश्वदेवाविति वैश्व–देवौ ।
पिशङ्गौ । तूपरौ । मारुतः । कल्माषः । आग्नेयः । कृष्णः । अजः ।
सारस्वती । मेषी । वारुणः । कृष्णः । एकशितिपादित्येक–शितिपात् ।
पेत्वः ॥ **62 (22)**

*(अग्नये – द्वाविꣳशतिः) (A24)*

=============

**Prasna Korvai with starting Padams of 1 to 24 Anuvaakams :-**

(यदेकेन – प्रजापतिः प्रेणाऽनु – यजुषा – ऽऽपो – विश्वकर्मा – ऽग्न आ याहि – सुवर्गाय वज्रो – गायत्रेणा – ग्न उदधे – समीची – न्द्राय – मयु – रपां – बलाय – पुरुषमृगः – सौरी – पृषतः – शका – रुरु – रलजः – सुपर्ण – आग्नेयो – ऽश्वो – ऽग्नयेऽनीकवते – चतुर्विꣳशतिः)

**Korvai with starting Padams of 1, 11, 21 Series of Panchaatis :-**

(यदेकेन – स पापीया – नेतद्वा अग्ने – र्धनुस्तद् – देवास्त्वेन्द्रज्येष्ठा – अपां नप्त्रे – ऽश्वस्तूपरो – द्विषष्टिः)

**First and Last Padam of Fifth Prasnam of 5th Kandam**

(यदेके – नैकशितिपात् पेत्वः)

॥ हरिः ओं ॥

॥ कृष्ण यजुर्वेदीय तैत्तिरीय संहितायां पद पाठे पञ्चमकाण्डे

पञ्चमः प्रश्नः समाप्तः ॥

---

**Details of Panchati and Padam for Kandam 5 , Prasanam 5 (TS 5.5)**

| | Panchati | Padams |
|---|---|---|
| Anuvakam 1 | 7 | 338 |
| Anuvakam 2 | 7 | 340 |
| Anuvakam 3 | 3 | 174 |
| Anuvakam 4 | 4 | 218 |
| Anuvakam 5 | 4 | 203 |
| Anuvakam 6 | 3 | 166 |
| Anuvakam 7 | 5 | 258 |
| Anuvakam 8 | 3 | 172 |
| Anuvakam 9 | 5 | 232 |
| Anuvakam 10 | 7 | 350 |
| Anuvakam 11 | 1 | 28 |
| Anuvakam 12 | 1 | 23 |
| Anuvakam 13 | 1 | 19 |
| Anuvakam 14 | 1 | 18 |
| Anuvakam 15 | 1 | 18 |
| Anuvakam 16 | 1 | 18 |
| Anuvakam 17 | 1 | 18 |
| Anuvakam 18 | 1 | 18 |
| Anuvakam 19 | 1 | 20 |
| Anuvakam 20 | 1 | 18 |
| Anuvakam 21 | 1 | 18 |
| Anuvakam 22 | 1 | 22 |
| Anuvakam 23 | 1 | 16 |
| Anuvakam 24 | 1 | 22 |
| Total → | 62 | 2727 |

**Notes:**

1. **Please refer to the book "TS Kandam 1" and "TS 1.1 pada paadam with Vaakyam" for notes and conventions used in this Compilation.**
2. **Please download our vedic compilations from our web site www.vedavms.in**